पित्तरोगहराण्याढ्ः स्निग्धोष्णानि गुरूणि च” सुश्रुतः।

**निकोठक** पु० नि+कुठि—वुन् पृषो० नलोपः। अङ्कोठवृक्षे भरतः।

**निक्रमण** न० नितरां क्रमते यत्र नि+क्रम-आधारे ल्युट्। स्थाने “निक्रमणं निषदनं निवर्त्तनं यच्च पड्वीशमर्वतः” ऋ० १।१६२।१४ “निक्रमणं स्थानम्” भा०।

**निक्वण** पु० नि+क्वण—शब्दे “क्वणो वीणायाम्” पा० पक्षे अप्। वीणायाः शब्दे अमरः।

**निक्वाण** पु० क्वण—शब्दे पक्षे घञ्। वीणादेः शब्दे अमरः

**निक्षा** स्त्री निक्ष—अच्। निख्यायां (निकी) ख्याते क्षुद्रयूके उणादिकोषः।

**निक्षुभा** स्त्री नि+क्षुभ—क। १सूर्यपत्न्यां २ब्राह्मण्याञ्च हेमा० व्र०ख० भविष्यपु० “निक्षुभार्कव्रतं भानोः सदा प्रीतिविवर्द्धनम्” इत्युपक्रमे “निक्षुभा सूर्यपत्नी तया सहितोऽर्कः निक्षुभार्कः” तत्र व्याख्या, “निक्षुभा ब्राह्मणी ज्ञेया वाचकोऽर्कः प्रकीर्त्तितः” तत्रैव भविष्यपु०।

**निक्षिप्त** त्रि०नि+क्षिप—क्त।१त्यक्ते जटा०२कृतनिःक्षेपद्रव्ये च

**निक्षेप** पु० नि+क्षिप—घञ्। १निःक्षेपशब्दार्थे निःक्षेपशब्दे दृश्यम्। २शिल्पिहस्ते संस्कारार्थं द्रव्यादेरर्पणे च

**निखर्व** पु०१अयुतकोटिसंख्यायां २तत्संख्येये च “अर्वुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात्” लीला० नितरां खर्वः ३वामने त्रि० हेमच०।

**निखर्वट** पु० रावणसैन्यगतराक्षसभेदे “विरूपाक्षेण सुग्रीवस्तारेण च निखर्वटः” भा०व० २८४अ०।

**निखात** त्रि० नि+खन—क्त। खनित्वाऽऽरोपिते “अष्टादशद्वीपनिखातयूपः” रघुः।

**निखिल** त्रि० निवृत्तं खिलं शेषो यस्मात्। सकले समग्रे अमरः। “सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा” मनुः।

**निगड** पु०न०। नि+गल—अच् लस्य डः। १शृङ्खलायाम् वेडी)। निवृत्तो गडः सेचनमस्मात् कठिनत्वात्।२लोहमये हस्तिपादबन्धने अन्दुके अमरः। “संसारे संनिबद्धानां निगडच्छेदकर्त्तारि” ब्रह्मवै०पु० “बद्धापराणि परितो निगडान्यलावीत्” माघः। २बद्धे त्रि० “बद्धस्य निगडस्य च” मनुः “निगडः निगडितः” कुल्लू०। लस्य नडः। निगलः तत्रार्थे हेमच०।

**निगडित** त्रि०निगडो जातोऽस्य तार० इतच्। १बद्धे संयते

**निगण** पु० निगरण+पृषो०। १होमधूमे त्रिका०।

**निगद** पु० नि+गद—अच्।१भाषणे २शब्दमात्रे च अमरः। “यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते” ऋ० भाष्यधृतमन्त्रः। “निगदस्तु जनैर्वेद्यः” आगमोक्ते ३जपे च। कर्मणि घञ्। उच्चैर्जप्ये ४मन्त्रे च “य एवात्र मन्त्रो यो निगदः” शत०ब्रा० ११।२।१६।

**निगम** पु० निगम्यतेऽत्र अनेन वा नि+गम—घञ्। १पुरभेदे तत्र भवः अण् न वृद्धिः। २वाणिजे ३कटभेदे ४वणिक्पथे हट्टे मेदि०। ५निश्चये ६अध्वनि पर्य्यायकथनेन वेदार्थबोधके ७ग्रन्थभेदे हेमच० न्यायमतसिद्धे पञ्चावयवन्यायमध्ये चरमावयवे निगमनशब्दे दृश्यम्। ८न्यायशास्त्रे ९तन्त्रभेदे १०वेदे च। “निगमकल्पतरोर्गलितं फलम्” भाग० १।१।२

“आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा” ऋ०अनुक्रमणिकायाम् “निगमशब्दो वेदवाची यास्केन तत्र तत्रापि निगमो भवतीत्येवं वेदवाक्यानामवतारितत्वात् तस्मिन् निगम एव प्रायेण वर्त्तमानानां शब्दानां चतुर्थाध्यायरूपे द्वितीयस्मिन् काण्डे उपदिष्टत्वात्तस्य काण्डस्य नैगमत्वम्” ऋग्वेदभाष्ये माधवः।

**निगमन** न० निगम्यतेऽनेन करणे ल्युट्। १न्यायस्य चरमावयवे। निगमनलक्षणं गौ०सू० उक्तं यथा

“हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्” गौ०सू० “साधर्म्योक्ते वैधर्म्योक्ते वा यथोदाहरणमुपसंह्रियते तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्दः इति निगमनम् निगम्यन्तेऽनेनेति प्रतिज्ञाहेतूदाहरणोपनया एकत्रेति निगमनम् निगम्यन्ते समर्थ्यन्ते सम्बोध्यन्ते तत्र साधर्म्योक्ते तावद्धेतौ वाक्यम् अनित्यः शब्दः इति प्रतिज्ञा, उत्पत्तिधर्मकत्वादिति हेतुः। उत्पत्तिधर्मकं स्थाल्यादिद्रव्यमनित्यमित्युदाहरणम्। तथा चोत्पत्तिधर्मकः शब्द इत्युपनयः तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति निगमनम् वैधर्म्योक्तेऽपि अनित्यः शब्द उत्पत्तिधर्मकत्वात् अनुत्पत्तिधर्मकमात्मादि द्रव्यं नित्यं दृष्टम् न च तथाऽनुत्पत्तिधर्मकः शब्दः तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति” भाष्यम्।

तत्सूत्रं वृत्तौ तु अन्यथा व्याख्यातम्।

“हेतोर्व्याप्तिविशिष्टपक्षधर्मस्य अपदेशः कथनं प्रतिज्ञायाः प्रतिज्ञार्थस्य साध्यविशिष्टपक्षस्य वचनं निगमनं तथा च व्याप्तिविशिष्टपक्षधर्महेतुकथनपूर्वकसाध्यविशिष्टपक्षप्रदर्शकः व्याप्तपक्षधर्महेतुज्ञाप्यसाध्यविशिष्ट-